# प्राक्कथनम्

नमः पाश्चात्यविद्वद्भ्यः येषां मुकुरमानसे।
वाग्देवीहंससौन्दर्यं प्राच्यमीषदबिम्बयत्॥

अस्मिन्नक्षिक्ष्माखयुगलमिते संवत्सरवरे वरेण्यनगरे नवदेहल्याख्ये समाहूते पञ्चदशे विश्वसंस्कृतसम्मेलने आधुनिकसंस्कृतसाहित्यविषयं सत्रविशेषः इदंप्रथमतया समयुज्यत। बह्वो विद्वांसो जम्बुद्वीपस्य नानादिग्देशेभ्यः साहित्याध्ययनश्रवणार्थमागताः येषां मध्ये विरला एव वैदेशिका अभूवन्। तत्कारणं सुबोधमेव। आधुनिकसंस्कृतसाहित्यविषये पक्षद्वयं वर्तते। तद्यथा भारतवर्षे संस्कृतग्रन्थसंकलनं काव्यरचनं कथानुबन्धनं नाटकाभिनयनं च सर्वदिशं प्रवर्तत इति संस्कृतभाषायाः प्रयोगो नैसर्गिको भवति। तस्मात् - किं नवीनं संस्कृतं सत्यतः साहित्यपदमारोढुं क्षममित्यादि प्रश्नजालं पिष्टपेषणमात्रमिति प्रथमः पक्षः। द्वितीयः पक्षः प्रायेण वैदेशिविद्वदुपपन्नो यत् - नवीनं संस्कृतं नास्ति न तात्त्विकं वा यतो जगन्नाथपण्डितकालोत्तरं संस्कृतभाषा प्रयुक्तापि मृतप्राया एव। अद्य तु संस्कृतस्य लतिनादिमृतभाषास्वन्तर्भावः तत्प्रयोगो मृतसंजीवनवदनुपपन्नोऽशक्यश्चेति।[1] तत्तु पाश्चात्यविदुषां न सार्वत्रिकं मतम्।[2] अद्यतनभारतीयकवीनां तत्काव्यानां तत्रत्यकविसम्मेलनानां परिचितिवशात्तु आधुनिकं संस्कृतसाहित्यस्य साक्षाज्जीवनं स्वतःसिद्धम्। किंच अद्यत्वे न अत्यन्तविस्मृतं विस्मयकरमेव घटनं यत् सत्याग्रहगीता-जार्मणिकाव्यादयो[3] नवीनाः काव्यग्रन्था अप्रतिमार्वाचीनसंस्कृतसाहित्यचूडामणयः प्रथमं यूरोपीयदेशेषु प्रकाशिताः।

[1] Sheldon Pollock: “The Death of Sanskrit”. In: *Comparative Studies in Society and History, International Quarterly* 43.2 (April 2001), Cambridge. [2] Jürgen Hanneder: “On the Death of Sanskrit”. In: *Indo-Iranian Journal* 45 (2002), p. 293–310. [3] क्षमा राव - सत्याग्रहगीता Paris: Adrien Maisonneuve 1932. श्याम कुमार तगोर - Germany Kavya, Leipzig 1913.

तथापि आधुनिकं संस्कृतं यूरोपीयदेशेषु अमेरिकाभूखण्डे वा उपेक्षितप्रायमाभाति। पुस्तकालयेषु महत्स्वपि आधुनिकं संस्कृतसाहित्यं न सम्यक्प्रतिष्ठां लभते।

तस्मादेव कारणाद्यदा विश्वसंस्कृतसम्मेलनानन्तरं कुलपती राधावल्लभत्रिपाठिमहोदयः आधुनिकं संस्कृतसाहित्यविषयकसत्र उपस्थापितानां निबन्धानां तत्सत्रश्चावितानामध्ययनानां सङ्कलने सम्पादने चेमं जनं नियोजितवानित्येतदाश्चर्यावहम् । किंतु यथोक्तवान् शार्माण्यदेशीयानां संस्कृताध्यायिनामादिगुरुः श्लेगल्महोदयः शताब्दयुगलात्पूर्वं -

> "कव्याशयः तत्कल्पसमवेतत्वं च साकल्येन अभिज्ञानं किञ्चिद्दूरस्थस्यैव सम्भवति।"[4]

तन्न्यायानुसारेण दूरस्थोऽयं जन आधुनिकसंस्कृतसाहित्यविषये किंचिद्वक्तुं धृष्णोति।

मादृशानां पाश्चात्त्यानां भारतीयविद्याध्येतॄणां प्राचीनसंस्कृतसमयाः प्रमाणम्। तेषामाधुनिकसंस्कृतशब्दार्थसमूहः हिन्दीभाषोद्धृत आङ्ग्लभाषानुकृतो वा अविज्ञातप्रायः । यथा आतङ्कवादः ("terrorism")। बहुशोऽर्थविपरिणाम उपलक्ष्यते यथा पर्वशब्दः उत्सवार्थे समस्या ("problem") इति वा आधुनिकार्थे।

कृत्स्नभाषानिबद्धानां साहित्यकृतीनां विषये प्रायेण अनेके अध्येतृवर्गाः वर्तन्ते। केचन स्वयं काव्यकर्तारः, अन्ये काव्यविवेचकाः (critic), अपरे च विश्वविद्यालयान्वीक्षकाः । आधुनिकसंस्कृतसाहित्यस्यायं विशेषः यत् तद्विद्वांसः सर्वतन्त्रस्वतन्त्राः दरीदृश्यन्ते। काव्यसमीक्षका बहुशः स्वयमेव काव्यकर्तारोऽलङ्कारशास्त्रनिष्णाताश्च। तद्व्यवस्था अस्मिन्नेव ग्रन्थे प्राप्यते यत्र प्रख्याताः कवयो हर्षदेवमाधव-नारायणदाश-आदयो विवेचकभूमिकालङ्कृताः समुज्जृम्भन्ते।

[4] »Auch muß man wohl in einer gewissen Ferne stehen, um das Wollen eines Dichters im Verhältnisse zu seinem Zeitalter erschöpfend richtig zu erfassen.« August Wilhelm Schlegel: *Geschichte der romantischen Literatur*. Ed. Edgar Lohner. Stuttgart 1965, p. 79.

पाश्चात्त्यविदुषामाधुनिकं संस्कृतसाहित्यं विस्मयकरं संशयकरं च। कथं प्राचीनभाषानुस्यूतसंवित्तिराधुनिकार्थप्रकाशनक्षमा, किं अद्यतनैः कविभिः संस्कृतभाषा नवीकृता, कथमिव च, न चेत् कथं नवीनता समाजपरिवर्तनादिषु अभिधेया इत्यादयो नवीनसाहित्यसमस्या अस्मिन्नपि ग्रन्थे परिशीलिताः।

अस्य ग्रन्थसन्दर्भस्य संकलने संस्कृतविद्वत्परम्परागता उदाहरणरीतिर्नवीनाया रीतेः भिन्ना इति सुविज्ञातम्। अद्यत्वे पण्डितोदाहृतवाक्यस्य स्वयम्प्रमाणत्वाभावे प्रकाशितपुस्तकस्य प्रमाकरणं मुद्रणदेशकालपृष्ठैर्विना सुदुर्लभं यस्मात्पश्चिमविदुषां परम्परायां ग्रन्थनाम-तत्कर्तृ-प्रकाशनस्थान-वासरादिकलायुक्तमेव उदाहरणं सकलं भवति। कलाविहीनं तु न प्रतिपत्तव्यमिति। केवलं सर्वसामान्यान्युदाहरणानि न कलासामग्रीमुपेक्षन्ते। किंतु यत् पश्चिमविदुषां सुविज्ञातं तत् प्राच्यविदुषां न भवेद्यच्च प्राच्यानां कण्ठस्थं तत्पश्चिमाणां किल न तथा भवति। तस्मादस्मिन्पुस्तके सा रीतिः शिथिलीकृता।

किंच प्रकाशयितॄणामन्यन्मर्मस्थानं वर्तते यत् छन्दःप्रयोगे नवीनं स्वातन्त्र्यं वर्तते। अर्वाचीनः कविवर्गः एकतः उपजातिमालिन्यादि परिचितं वृत्तजालमुपयुङ्क्ते, अपरतस्तु स्वच्छन्दं वृत्तम्। वयं विरलेष्ववकाशेषु न निश्चेतुमलं यद्वृत्तभङ्गो वृत्तस्वातन्त्र्यं वा प्राप्तं यथा अग्रे[5] उद्धृते प्रतिपदं यगणाष्टकात्मके श्लोके प्रथमे पादे मगण उपलभ्यते। निरङ्कुशाः कवय इति न्यायान्न शोधितमस्माभिः। यत्र तु त्रुटितं मुद्रणपिशाचिकामूलमित्याशङ्कितं अस्माभिः तत्र तत् यथाशक्ति शोधितम्।[6]

Jürgen Hanneder

[5] पृ॰ १२३ द्रष्टव्यम्।  [6] यत्पुनः मूलग्रन्थे कवयितृप्रमादमूला अशुद्धपाठा उपलभ्यन्ते, ते वृत्तभङ्गभयात् यथामुद्रितम् उद्धृताः। तद्यथा उत्थास्यामि (उत्थापयिष्यामीति साधु), सीमाः (सीमानः), वमितम् (वान्तम्), दुहितां (दुहितरं), कोऽपि स्त्री (कापि स्त्री), इमा विधवा (इयं विधवा) इति कश्मीरक्रन्दनाख्ये नाटकचक्रे।